# Ganesha Ashtottarashatanama Stotram

# ગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Ganesha Ashtottarashatanama Stotram 2

File name : gaNeshAShTottarashatanAmastotram2.itx

Category : ganesha, aShTottarashatanAma, shivarahasya

Location : doc_ganesha

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 12 | 50-82||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# ગણેશાષ્ટોત્તરશતનામસ્તોત્રમ્

- શિવપાર્વતીસંવાદે -
શ્રીશિવ ઉવાચ -
કાશ્યાં તુ બહવો વિઘ્નાઃ કાશીવાસવિયોજકાઃ ।
તચ્છાન્ત્યર્થં દુણ્ઢિરાજઃ પૂજનીયઃ પ્રયત્નતઃ ॥ ૫૦॥

અષ્ટોત્તરશતં દિવ્યૈર્ગણેશસ્યૈવ નામભિઃ ।
કર્તવ્યમતિયત્નેન નવદૂર્વાઙ્કુરાર્પણમ્ ॥ ૫૧॥

હિરણ્મયતનું શુદ્ધં સર્વાર્તિહરમવ્યયમ્ ।
વરદં ગણપં ધ્યાત્વા પૂજા કાર્યા પ્રયત્નતઃ ॥ ૫૨॥

ઋષિર્વિઘ્નેશ ઇત્યાદિનામ્નાં સર્વેશ્વરઃ શિવઃ ।
દેવતા વિઘ્નરાજોઽત્ર છન્દોઽનુષ્ટુપ્ શુભપ્રદમ્ ॥ ૫૩॥

સર્વપ્રત્યૂહશમનં ફલં શક્તિઃ સુધાત્મિકા ।
કીલકં ગણનાથસ્ય પૂજા કાર્યેતિ કામદા ॥ ૫૪॥

અથ નામાવલિઃ ।
ૐ વિઘ્નેશો વિશ્વવરદો વિશ્વચક્ષુર્જગત્પતિઃ । (વિશ્વવદનો)
હિરણ્યરૂપઃ સર્વાત્મા જ્ઞાનરૂપો જગન્મયઃ ॥ ૫૫॥

સર્વજ્ઞઃ સર્વગઃ શાન્તો ગજાસ્યો વિગતજ્વરઃ ।
વિશ્વમૂર્તિરમેયાત્મા વિશ્વાધારઃ સનાતનઃ ॥ ૫૬॥

સામગાનપ્રિયો મન્ત્રી સત્ત્વાધારઃ સુરાધિપઃ ।
સમસ્તસાક્ષી નિર્દ્વન્દ્વો નિર્લિપ્તોઽમોઘવિક્રમઃ ॥ ૫૭॥

નિયતો નિર્મલઃ પુણ્યકામદઃ કાન્તિદઃ કવિઃ ॥ ૫૮॥

કામરૂપી કામવેષો કમલાક્ષઃ કલાધરઃ ।
સુમુખઃ સર્વદઃ શુદ્ધો મૂષિકાધિપવાહનઃ ॥ ૫૯॥ (સુમુખઃ સર્વદઃ)

દીર્ઘતુણ્ડધનુઃ શ્રીમાનનન્તો મોહવર્જિતઃ ।
વક્રતુણ્ડઃ શૂર્પકર્ણો પરમં પાવનેશ્વરઃ ॥ ૬૦॥ (પવનઃ પાવનો વરઃ)

યોગીશો યોગવન્દ્યાઙ્ઘ્રિરુમાજનુરયાપહઃ ।
એકદન્તો મહાગ્રીવઃ શરણ્યઃ સિદ્ધસેવિતઃ ॥ ૬૧॥

સિદ્ધિદઃ કરુણાસિન્ધુઃ ભગવાન્ ભવ્યવિગ્રહઃ ।
વિકટઃ કપિલો ઢુણ્ઢિરુગ્રો ભીમોદરઃ શુભઃ ॥ ૬૨॥ (ભીમોદરઃ)

ગણાધ્યક્ષો ગણારાધ્યો ગણેશો ગણનાયકઃ ।
જ્યોતિઃસ્વરૂપો ભૂતાત્મા ધૂમકેતુરનાકુલઃ ॥ ૬૩॥

કુમારગુરુરાનન્દો હેરમ્બો વેદસંસ્તુતઃ ।
નાગોપવીતી દુર્ધર્ષો બાલદૂર્વાઙ્કુરપ્રિયઃ ॥ ૬૪॥

ભાલચન્દ્રો વિશ્વધામા શિવપુત્રો વિનાયકઃ ।
લીલાવલમ્બિતવપુઃ પૂર્ણઃ પરમસુન્દરઃ ॥ ૬૫॥

વિઘ્નાન્ધકારમાર્તાણ્ડો વિઘ્નારણ્યદવાનલઃ ।
સિન્ધૂરવદનો નિત્યો પ્રભુઃ પ્રથમપૂજિતઃ ॥ ૬૬॥ (વિષ્ણુઃ પ્રમથપૂજિતઃ)

શરણ્યદિવ્યપાદાબ્જો ભક્તમન્દારભૂરુહઃ ।
રત્નસિંહાસનાસીનો મણિકુણ્ડલમણ્ડિતઃ ॥ ૬૭॥

ભક્તકલ્યાણદોઽમેયઃ કલ્યાણગુણસંશ્રયઃ ।
એતાનિ દિવ્યનામાનિ ગણેશસ્ય મહાત્મનઃ ॥ ૬૮॥

પઠનીયાનિ યત્નેન સર્વથા સર્વદેહિભિઃ । (સર્વદા)
નામ્નામેકૈકમેતેષાં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૬૯॥

અથ ઉપદેશઃ
સર્વવિઘ્નેશ નામ્નાં તુ ફલં વક્તું ન શક્યતે ।
એકૈકમેવ તન્નામ દિવ્યં જપ્ત્વા મુનીશ્વરાઃ ॥ ૭૦॥

પ્રત્યૂહમાત્રરહિતાસ્તિષ્ઠન્તિ શિવપૂજકાઃ ।
દૂર્વાયુગ્માનિ સઙ્ગૃહ્ય નૂતનાન્યતિયત્નતઃ ॥ ૭૧॥

પૂજનીયો ગણાધ્યક્ષો નામ્નામેકૈકસઙ્ખ્યયા ।
નભસ્યશુક્લપક્ષસ્ય ચતુર્થ્યાં વિધિપૂર્વકમ્ ॥ ૭૨॥

વક્રતુણ્ડેશકુણ્ડે તુ સ્નાનં કૃત્વા પ્રયત્નતઃ ।

વક્રતુણ્ડેશમારાધ્ય સર્વાભીષ્ટપ્રદાયકમ્ ॥ ૭૩॥

ધ્યાયેદઘહરં શુદ્ધકાઞ્ચનાભમનામયમ્ ।
તતઃ પૂજાં યથાશાસ્ત્રં કૃત્વા દૂર્વાઙ્કુરૈર્નવૈઃ ॥ ૭૪॥

પૂજા કાર્યા વિશેષેણ નામોચ્ચારણપૂર્વકમ્ ।
તતશ્ચ મોદકૈર્દિવ્યૈઃ સુગન્ધિઘૃતપાચિતૈઃ ॥ ૭૫॥

નૈવેદ્યં કલ્પયેદ્દિવ્યં ગણેશાય શુભાવહમ્ ।
અન્યૈશ્ચ પરમાન્નાદ્યૈર્ભક્ષ્યૈર્ભોજ્યૈર્મનોહરૈઃ ॥ ૭૬॥

તોષણીયઃ પ્રયત્નેન વક્રતુણ્ડવિનાયકઃ ।
પ્રદક્ષિણનમસ્કારૈર્દિવ્યૈસ્તન્નામસઙ્ખ્યયા ॥ ૭૭॥

કર્તવ્યા નિયતં શુદ્ધૈર્મૌનવ્રતપરાયણઃ ।
તતઃ સન્તર્પ્ય વિધિચ્ચૈવાન્બ્રાહ્મણસમ્ભાવાન્ ॥ ૭૮॥ (બ્રાહ્મણસત્તમાન્)

પુનરભ્યર્ચ્ય વિઘ્નેશમિમં મન્ત્રમુદીરયેત્ ॥ ૭૯॥

અથ મન્ત્રઃ
વક્રતુણ્ડ સુરારાધ્ય સૂર્યકોટિસમપ્રભ ।
નિર્વિઘ્નેનૈવ સતતં કાશીવાસં પ્રયચ્છ મે ॥ ૮૦॥

ઇતિ સમ્પ્રાર્થ્ય વિધિવત્પૂજાં કૃત્વા પુનર્મુદા ।
નમસ્કૃત્વા પ્રસાદ્યૈનં ગચ્છેડ્ઢુણ્ઢિવિનાયકમ્ ॥ ૮૧॥

ઢુણ્ઢિરાજાર્ચનં સમ્યક્કર્તવ્યં વિધિપૂર્વકમ્ ।
તત્રૈવાર્ચાવિશેષેણ પૂજાં કૃત્વા તતઃ પરમ્ ॥ ૮૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ગણેશાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૨ । ૫૦-૮૨॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 12 . 50-82..

Notes:
Śiva શિવ tells Pārvatī પાર્વતી that to have obstacle-free access to Kaśī કાશી, one must worship Dhuṇḍhirāja ઢુણ્ઢિરાજ in the prescribed manner especially on Śukla Caturthī શુક્લ ચતુર્થી; and enlists Aṣṭottaraśatanāmāni અષ્ટોત્તરશતનામાનિ of Gaṇeśa of ગણેશ for the purpose.

Proofread by Ruma Dewan

*Ganesha Ashtottarashatanama Stotram*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*